॥ श्रीरामरक्षास्तॊत्रम ॥

ध्यायॆदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासॊ वसानं नवकमलदलस्पर्धिनॆत्रं प्रसन्नम ।
वामांकारूढसीतामुखकमलमिलल्लॊचनं नीरदाभं
नानालंकारदीप्तं दधतमुरुजटामंडनं रामचंद्रम ॥

चरितं रघुनाथस्य शतकॊटिप्रविस्तरम ।
ऎकैकमक्षरं पुंसां महापातकनाशनम ॥ १ ॥

ध्यात्वानीलॊत्पलश्यामं रामं राजीवलॊचनम ।
जानकीलक्ष्मणॊपॆतं जटामकुटमंडितम ॥ २ ॥

सासितूणधनुर्बाणपाणिं नक्तंचरांतकम ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम ॥ ३ ॥

रामरक्षां पठॆत प्राज्ञः पापघ्नीं सर्वकामदाम ।
शिरॊ मॆ राघवः पातु फालं दशरथात्मजः ॥ ४ ॥

कौसल्यॆयॊ दृशौ पातु विश्वामित्रप्रियः श्रुती ।
घ्राणं त्रातु मखत्राता मुखं स्ॐइत्रिवत्सलः ॥ ५ ॥

जिह्वां विद्यानिधिः पातु कंठं भरतवंदितः ।
स्कंधौ दिव्यायुधः पातु भुजौ भग्नॆशकार्मुकः ॥ ६ ॥

करौ सीतापतिः पातु हृदयं जामदग्न्यजित ।
मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः ॥ ७ ॥

सुग्रीवॆशः कटिं पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत ॥ ८ ॥

जानुनी सॆतुकृत पातु जंघॆ दशमुखांतकः ।
पादौ विभीषणश्रीदः पातु रामॊऽखिलं वपुः ॥ ९ ॥

ऎतां रामबलॊपॆतां रक्षां यः सुकृती पठॆत ।
स चिरायुः सुखी पुत्री विजयी विनयी भवॆत ॥ १० ॥

पातालभूतलव्यॊमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्तॆ रक्षितं रामनामभिः ॥ ११ ॥

रामॆति रामभद्रॆति रामचंद्रॆति वा स्मरन ।
नरॊ न लिप्यतॆ पापैर्भुक्तिं मुक्तिं च विंदति ॥ १२ ॥

जगज्जैत्रैकमंत्रेण रामनाम्नाऽभिरक्षितम ।
यः कंठे धारयेत तस्य करस्थाः सर्वसिद्धयः ॥ १३ ॥

वज्रपंजरनामेदं यो रामकवचं स्मरेत ।
अव्याहताज्ञः सर्वत्र लभते जयमंगलम ॥ १४ ॥

आदिष्टवान यथा स्वप्ने रामरक्षामिमां हरः ।
तथा लिखितवान प्रातः प्रबुद्धो बुधकौशिकः ॥ १५ ॥

आरामः कल्पवृक्षाणां विआमः सकलापदाम ।
अभिरामस्त्रिलोकानां रामः श्रीमान स नः प्रभुः ॥ १६ ॥

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ।
पुंडरीकविशालाक्षौ चीरकृष्णाजिनांबरौ ॥ १७ ॥

फलमूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ १८ ॥

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम ।
रक्षःकुलनिहंतारौ त्रायेतां नो रघूत्तमौ ॥ १९ ॥

www.yousigma.com

आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ ।
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्चताम ॥ २० ॥

सन्नद्धः कवची खड्‌गी चापबाणधरॊ युवा ।
गच्चन मनॊरथॊऽस्माकं रामः पातु सलक्ष्मणः ॥ २१ ॥

रामॊ दाशरथिः शूरॊ लक्ष्मणानुचरॊ बली ।
काकुत्स्थः पुरुषः पूर्णः कौसल्यॆयॊ रघूत्तमः ॥ २२ ॥

वॆदांतवॆद्यॊ यज्ञॆशः पुराणपुरुषॊत्तमः ।
जानकीवल्लभः श्रीमान अप्रमॆयपराक्रमः ॥ २३ ॥

इत्यॆतानि जपन नित्यं मद्भक्तः श्रद्धयाऽन्वितः ।
अश्वमॆधायुतं पुण्यं संप्राप्नॊति न संशयः ॥ २४ ॥

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम ।
स्तुवंति नामभिर्दिव्यैर्न तॆ संसारिणॊ नराः ॥ २५ ॥

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरं
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम ।

राजॆंद्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिं
वंदॆ लॊकाभिरामं रघुकुलतिलकं राघवं रावणारिम ॥ २६ ॥

रामाय रामभद्राय रामचंद्राय वॆधसॆ ।
रघुनाथाय नाथाय सीतायाःपतयॆ नमः ॥ २७ ॥

श्रीराम राम रघुनंदन राम राम
श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम ॥ २८ ॥

श्रीरामचंद्रचरणौ मनसा स्मरामि
श्रीरामचंद्रचरणौ वचसा गृणामि ।
श्रीरामचंद्रचरणौ शिरसा नमामि
श्रीरामचंद्रचरणौ शरणं प्रपद्‌यॆ ॥ २९ ॥

माता रामॊ मत्पिता रामचंद्रः
स्वामि रामॊ मत्सखा रामचंद्रः ।
सर्वस्वं मॆ रामचंद्रॊ दयालुः
नान्यद दैवं नैव जानॆ न जानॆ ॥ ३० ॥

www.yousigma.com

दक्षिणो लक्ष्मणो यस्य वामो तु जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वंदो रघुनंदनम ॥ ३१ ॥

लोकाभिरामं रणरंगधीरं राजीवनोत्रं रघुवंशनाथम ।
कारुण्यरूपं करुणाकरं तं श्रीरामचंद्रं शरणं प्रपद्यो ॥ ३२ ॥

मनोजवं मारुततुल्यवोगं जितोंद्रियं बुद्धिमतां वरिष्ठम ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्यो ॥ ३३ ॥

कूजंतं राम रामोति मधुरं मधुराक्षरम ।
आरुह्य कविताशाखां वंदो वाल्मीकिकोकिलम ॥ ३४ ॥

आपदामपहर्तारं दातारं सर्वसंपदाम ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम ॥ ३५ ॥

भर्जनं भवबीजानामार्जनं सुखसंपदाम ।
तर्जनं यमदूतानां रामरामोति गर्जनम ॥ ३६ ॥

रामो राजमणिः सदा विजयतो रामं रमोशं भजो
रामोणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं

रामॊ चित्तलयः सदा भवतु मॆ भॊ राम मामुद्धर ॥ ३७ ॥

श्रीराम रामॆति रमॆ रामॆ मनॊरमॆ ।
सहस्रनाम तत्तुल्यं रामनाम वराननॆ ॥ ३८ ॥

॥ इति बुधकौशिकसंगृहीतं श्रीरामरक्षास्तॊत्रम ॥

www.yousigma.com